ज्ञान-विज्ञान विमुक्तये

ISSN 2277 - 5730

AN INTERNATIONAL MULTIDISCIPLINARY QUARTERLY RESEARCH JOURNAL

# AJANTA

Peer Reviewed Refereed and
UGC Listed Journal
(Journal No. 40776)

Volume-VII, Issue-I
January - March - 2018

IMPACT FACTOR / INDEXING
2017 - 5.505
www.sjifactor.com

PRINCIPAL
Govt. College of Arts & Science
Aurangabad

Ajanta Prakashan

| | | | |
|---|---|---|---|
| २३ | प्रा. मंदाकिनी मेश्राम | तुकारामांचे पारमार्थिक अभंग | १००-१०१ |
| २४ | संतोष पी. बुरकूल | नांदगांव तालुक्यातील कृषी भूमीउपयोजनाचा भौगोलिक अभ्यास | १०२-१०५ |
| २५ | प्रा. राजेश एस. डोंगरे | विदर्भाच्या आर्थिक मागासलेपणाची कारणमीमांसा | १०६-१०९ |
| २६ | श्री. संदिप सुभाषराव तंबाखे<br>प्रा. डॉ. अशोक टी. खोब्रागडे | राजर्षी शाहू महाराज : एक कृतिशील समाजसुधारक | ११०-११२ |
| २७ | विकास विठ्ठलराव कुंभारे<br>प्रा. डॉ. धर्मेश धवनकर | शेतीतील भौगोलिक व सांस्कृतिक बदल | ११३-११८ |
| २८ | पंकजा वाघमारे | कालिदासस्य अभिज्ञानशाकुन्तले नैतिकमूल्यानां दर्शनम् । | ११९-१२२ |



| |
|---|
| 'अजिंठा' या त्रैमासिकात प्रसिध्द झालेली मते मुख्य संपादक, संपादक मंडळ व सल्लागार मंडळास मान्य असतीलच असे नाही. या नियतकालिकात प्रसिध्द करण्यात आलेली लेखकाची मते ही त्यांची वैयक्तिक मते आहेत. |
| तसेच शोधनिबंधाची जबाबदारी स्वत: लेखकावर राहील. हे नियतकालिक मालक मुद्रक प्रकाशक विनय शंकरराव हातोले यांनी अजिंठा कॉम्प्युटर अॅण्ड प्रिंटर्स जयसिंगपुरा विद्यापीठ गेट औरंगाबाद येथे मुद्रित व प्रकाशित केले. |




Govt. College of Arts & Science Aurangabad

PRINCIPAL
Govt. College of Arts & Science
Aurangabad

२८

# कालिदासस्य अभिज्ञानशाकुन्तले नैतिकमूल्यानां दर्शनम् ।

**पंकजा वाघमारे**
संस्कृत विभाग प्रमुख, शासकीय ज्ञानविज्ञान महाविद्यालय, औरंगाबाद.

अभिज्ञानशाकुन्तलम् न केवलं संस्कृतनाट्यजगति अपितु अखिले विश्वसाहित्ये महान ग्रन्थः अस्ति । यस्मिन् सन्दर्भे बहुश्रुता एका उक्ति : अस्ति,यत्

काव्येषु नाटकं रम्यं तत्र रम्यं शाकुन्तलम ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम ।

अभिज्ञानशाकुन्तले कालिदासस्य काव्यप्रतिभा अतीव मनोहारिणी अस्ति । तस्यां भारतीय – संस्कृतेः उदात्तता, प्रेम्णः स्थैर्यं, प्रकृतेः मानवताः कण्वमुनेः वत्सलता, दुर्वाससः क्रोधः इत्यादीनां भावमूल्यानां दर्शन भवति । अस्मिन् नाटके उत्कृटा कथावस्तु, सुयोग्यं पात्रसंयोजनं, उत्तमा रसाभिव्यक्तिः, रसानुकूला भाषाशैली, एतादृशानां घटकानां अतीव सुन्दरं संमीश्रणं दृश्यते, अतः समीक्षकाः, वदन्ति –

'कालिदासस्य सर्वस्वमभिज्ञानशाकुनतलम् ।
बहुभिः विदवद्जनैः अस्य सर्वकषं अध्ययनं कृतमस्ति ।'

अस्य नाटकस्य यदि वयं मूलं पश्यामः तर्हि महाभारते एकं स्वल्पं, नीरसं कथानकम् अस्ति । अस्य कथानकस्व अतीव सुन्दनं प्रस्तूतीकरणं कालिदासेन शाकुन्तलरुपेण कृतमस्ति । कथायां तेन बहूनि परिवर्तनानि कृतानि सन्ति । यदि तस्य कारणं वयं पश्यामः तह्रि एकं महत्त्वपूर्णं कारणं एतदेव दृश्यते यत्

'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ।'

एतत्सत्यं, तर्हि एतत् समाजप्रबोधनस्य महत्त्वपूर्णं माध्यमं वर्तते । तस्मात् नाटककारस्य मूलतः नैतिकं उत्तरदायित्वं समाजं प्रति आसीत् । सन्दर्भे कालिदासेन निश्चितरुपेण यशः प्राप्तमस्ति ।

कालिदासः परिणतप्रज्ञः, सिद्धहस्तः, प्रतिभासंपन्नः च आसीत् एव अपिलु सः नीतिशास्त्रज्ञः अपि आसीत् । त्रिकालाबाधितेषु साहित्येषु मूल्यसंगोपनसन्दर्भे, संक्रमणसन्दर्भे च ये ये विचाराः मण्डिताः सन्ति तत्र न केवलं मूल्यसंक्रमणसन्दर्भे ते विचाराः प्रस्तूताः भवनित अपितु भाषायाः लालित्यं, रसवत्ता, अलंकारदिनां मण्डनं तत्र भवत्येव । कालिदासस्य अपि कार्यं दृष्टिपथं आयाति । यदि तस्य शाकुन्तले मूल्यदर्शनं न भवति चेत् नाटकेन श्रेष्ठत्वं न प्राप्तं स्यात् ।



Govt. College of Arts & Science Aurangabad
PRINCIPAL
Govt. College of Arts & Science

'अंकं केऽपि शशंकिरे जलनिधेः पङ्कं पने मेनिरे ।'

एनं सुभाषितं अनुसृत्य चन्द्रमसि विविधान् अंशान् जनाः पश्यन्ति तथैव काऽपि रमणीयसाहित्यकृतीसन्दर्भे अपि एषा एव दृष्टिः भवति ।

अभिज्ञानशाकून्तलं एकं सर्वांगसुन्दरं, परिपुर्णं नाटकम् अस्ति । कविश्रेष्ठः कालिदासः अस्मिन् नाटके कानि कानि मूल्यानि समाजस्य पुरतः स्थापयति तेषां मूल्यानां प्रस्तुतीकरणं भवत्पुरतः कर्तुं अहं इच्छामि ।

**संस्कृत वाङ्मये**

'नीति' शब्दस्य अर्थः सदाचारः अस्ति ।

नीतिः नाम आचार – संहिता अपि अस्ति ।

कालिदासस्य नायकं प्रति यदि वयं पश्यामः तर्हि समाजस्य पुरतः दुष्यन्तस्य चरित्रेण सुबोध : न स्थाप्यते किन्तु कालिदासेन तस्य उज्ज्वलं चारित्र्यं दृश्यते, यावत्पर्यन्तं शकुन्तलायाः स्मरणं न भवति तावत्पर्यन्तं सः स्वीकारं कथं कर्तुम् शक्नोति ? शापकारणात् विस्मृतिप्राप्तः सः, सौन्दर्यपरिपूर्णा सति अपि शकुन्तलाया : स्वीकारं न करोति । दुष्यन्तस्य स्वभावचित्रणे यादृशी सदसद्विवेकबुद्धिः कालिदासेन दर्शिता अस्ति सा अतुलनीया । यदा सः सर्वं स्मरति तदा सः अतीव लज्जितः भवति, तस्य अन्तःकरणं पश्चात्तापदग्धं भवाति । अपराधकारणात् दुःखितः सः राजा सन् अपि शकुन्तलायाः पुरतः साष्टाङ्गं प्रणिपातं करोति । स्वस्य प्रमादस्वीकारस्य कीदृशी महत्ता अत्र दृश्यते ! 'परस्त्रीमातृसमाना' एतत् जीवनमूल्यं यथा वयं दुष्यन्तस्य व्यक्तिमत्त्वे एश्यामः तदेव मूल्यं अग्रे गत्वा 'शिवाजीमहाराजस्य' चारित्रे अपि दृश्यते । एवं किम् अपि मूल्यं तु चिरंतनं, शाश्वतं अस्ति । ऋषीणांकृते तस्य मनसि आदरः वर्तते, एतत् अपि श्रेष्ठं मूल्यंत अस्ति ।

कालिदासस्य नायिका शकुन्तला, एषा निसर्गकन्या अतीव रुपवती, विनम्रा च अस्ति । तस्याः व्यक्तिमत्त्वं अतीव मनोहरं अस्ति, किन्तु शाकुन्तलस्य पञ्चमे अङ्के तस्याः जाज्ज्वल्यं रूपं वयं पश्यामः । तत्र तस्याः सात्त्विक – कोपस्य आविष्कारः यथोचितं भारतीयं स्त्रीत्वं प्रकटयति । सा प्रथमतया तु विनम्रतया राज्ञः पुरतः स्वस्य व्यथां स्थापयति, विनतिं करोति किन्तु दुष्यन्तः यदा परिचयं न ददाति, तदा कुपिता सा स्वाभिमानं न त्यजति, दुष्यन्तस्य अधिके अनुनयं न करोति, अपमानिता, वञ्चनादग्धा सा ततः निर्गत्य स्वमात्रासह गमनं करोति, पुत्रं प्रसवति, धैर्येण तं पुत्रं वर्धयति, तस्य पालनं करोति, मनसि राज्ञः प्रतीक्षां अपि कुर्वती अस्ति, सर्वं पुत्रं वर्धयति, तस्य पालनं करोति, मनसि राज्ञः प्रतीक्षां अपि कुर्वती अस्ति, सर्वं दुःखं सोढ्ता सङ्कटानां अतिक्रमणं करोति । नूनं एतादृशी स्त्री कालिदासेन अस्मत्पुरतः स्थापिता अस्ति एतदेव तु शाकुन्तलस्य यशसः रहस्यं अस्ति । शकुन्तला न कातरा, सा निर्भया भारतीया स्त्री । सर्वदमनः यस्मात् कारणात् असमाकं देशः 'भारतः', वयं सर्वे 'भारतीयाश्च' ।

'वात्सल्यं' एतत् अन्यतमं मूल्यं वयं पश्यामः । शाकुन्तलस्य सुप्रसिद्धे चतुर्थे अङ्के तु कण्वमुनेः पितृहृदयम् प्रकर्षेण वयं अनुभवाम : । यदाय शकुन्तला पतिगृहं याति तदा कण्वमुनेः यादृशं वात्सल्यं शकुन्तलाया : प्रति कालिदासेन दर्शितं तत् तु न केवलं भारतीय नाटके अपितु विश्ववाङमये अजरामरं जातम् । अस्य प्रसङ्गस्य प्रभावः न केवलं भारतीयाणां मनसि अपितु विदेशीयाणां मनसि अपि कीदृशः जातः अस्ति तस्य जर्मन कवी गटे एकं प्रातिनिधिकं उदाहरणं



Govt. College of Arts & Science
PRINCIPAL
Govt. ...

अस्ति। अस्मिन् सन्दर्भे गटे महोदय: वर्णयति –

Wouldn't thou the young year's blossoms
And the fruits of its decline
And all by which the soul is charmed
Entraptured, fed ?
Woldn't thou the earth and Heaven itself
In one small name combine ?
I name thee, O shakuntala, and all
At once is said.

**(कालिदास – वा वि. मिराशी)**

**एष** : तु न केवलं कालिदासस्य अपितू कालिदासस्य साहित्ये प्रकटितानां जीवनमूल्यानां एव गौरव: इति अहं मन्ये ।

एतत् मूल्यं दिक्कालातीतं, त्रिकालाबाधितं अस्ति । वात्सल्यम् एतादृशस्य वात्सल्यमूल्यस्य आविष्कार: वयं शकून्तलाया: मातु : मध्ये मेनकायां अपि पश्याम:। स्वकन्याया:, स्वभर्त्राकृतं धिक्कारणं सा सोढुं न शक्नोति । परित्यक्तां शकुन्तलां गृत्त्वि सा निर्गच्छति, तस्या: उत्तरदायित्वं स्वीकरोति, वात्सल्येन, विना एतत् कथं शक्यं भवेत्?

दुष्यन्त: एक: सम्राट् । किन्तु राज्ञ: मनसि अपि एकं कीदृशं पितृहृदयं वसति एतत् कालिदासेन परिणामकारकतया दर्शितम् ।

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
का निवृत्तिं चेतसि तस्या कुर्या -
द्यस्यायमङ्गात्कृतिन: प्ररूढ: ? ॥

**(अभिज्ञानशाकुन्तलम् अंक : ७)**

नूनं एतादृशी वात्सल्यकारिणी अस्माकं भारतीया संस्कृति: । शाकुन्तलस्य अन्यानि पात्राणि अपि विलोभनीयानि । उदाहरणार्थं प्रियवंदा, अनसूया च।

एतासां सर्वासां सखीनां स्नेहभाव:, सख्यं च अतीवा विलोभनीयम् । ‘ मनोभूषा मैत्री’ एततु सूत्रमेवा । अस्मिसन् नाटके मैत्रीभाव : न केवलं सखीषु अपितु शकुन्तलाया: सख्यं तु चराचरेण सह दृश्यते । अस्माकं संस्कृते: महत्त्वपूर्णं मूल्यं कालिदासेनस अत्र दत्तम् । अस्मांक संस्कृति: चराचरेषु आत्मवत् पश्यति । शकुन्तला तस्य मूल्यस्य अतीव विलोभनीय – प्रतीकरुपेण अस्माकं पुरत: आगच्छति । कीदृशं कालिदासस्य सामर्थ्यं तत् तु शब्दातीतं । कतिसदृश्यते । अस्माकं संस्कृते: महत्त्वपूर्णं मूल्यं कालिदासेनस अत्र दत्तम् । अस्मांक संस्कृति: चराचरेषु आत्मवत् पश्यति । शकुन्तला



Govt. College of Arts & Science Aurangabad
PRINCIPAL
Govt. College of Arts & Science

तस्य मूल्यस्य अतीव विलोभनीय – प्रतीकरुपेण अस्माकं पुरतः आगच्छति । कीदृशं कालिदासस्य सामर्थ्यं तत् तु शब्दातीतं । कतिसहजतया तेन अस्मत्पुरतः अध्यात्मं अपि प्रतिपादितम् ।

अस्मांक संस्कृतिः अतिथिपूजका । शकुन्तलाया : तथैव तस्या : सख्यौ व्यक्तित्वे अपि अतिथिपूजनस्य मूल्यं वयं पश्यामः । अतिथिपूजनस्य मूल्यं वयं पश्यामः । अतिथिपूजनविस्मरणप्रसङ्गेन एव कालिदासः दुर्वासमुनेः शापस्य सन्दर्भे योजनां कर्तुं शक्नोति, तेन अतिथिपूजनस्य महत्त्वं अधोरेखितं कृतं तथा च अतिथेः अनादरस्य परिणामः अपि प्रदर्शितः ।

सांप्रतं वयं अतीव गम्भीरता यस्मिन् विषये चर्चां कूर्मः सः विषयोऽस्ति पर्यावरणरक्षणम् । कालिदासेन 'पर्यावरण' शब्द न कुत्राऽपि योजितः किन्तू तस्य रक्षणविषये साक्षात कृतिः कृता अस्ति । तस्य नायिका शकुन्तला साक्षात् निसर्गकन्या अस्ति । सा अस्मान् अतीव सम्यकतया निसर्गं प्रति स्नेहं कथं करणीयं अस्मिन् विषये सजीवं पाठं ददाति ।

स्वस्य कृतिद्वारा साहित्यकारः येषां मूल्यानां प्रस्थापनं करोति तस्मादेव सा कृति चिरन्तना भवति । अतः वयं तां कृतिं पुनः पुनः आस्वादयामः ।

अभिज्ञानशाकुन्तले बहूनि नैतिकमूल्यानि सन्ति, तेषु केवलं उदाहरणरूपेण कानिचित् मूल्यानि मया अत्र स्थापितानि । एषः तु वास्तविकतया बृहत्संशोधन विषयः । मया अत्र स्वल्पः प्रयत्नः कृतोऽस्ति, विस्तकारभयात् विरमामि ।

**सन्दर्भग्रन्थसूचि**


१. अभिज्ञानशाकून्तलम् – रा. शं. वाळिंबे

२. संस्कृत साहित्याचा सोपपात्तिक इतिहास – वि. वा. करंबेळकर

३. कालिदासाची सृष्टि - माधव अळतेकर

४. संस्कृत के प्रमुख नाटककार तथा उनकी कृतियाँ – डॉ. गंगासागरराय

५. कालिदास – वा. वि. मिराशी

६. संस्कृत साहित्य का विशद इतिहास – डॉ. पुष्पा गुप्ता

७. पाच संस्कृत नाटके – गो. के भट


Govt. College of Arts & Science Aurangabad.

PRINCIPAL
Govt. College of Arts & Science
Aurangabad